Subject- **Sanskrit.** Course Topic- **Gita (2nd chapter)**

Course Code-APSNS 601DEE-1B Coures Title- Kaavya & Philosophy.

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदःखदाः।**

**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत।।2/14।।**

शाङ्करभाष्यम्- 'मात्रा'अभिः मीयन्ते शव्दादय इति। श्रोत्रादीनि इन्द्रियानि, मात्राणां 'स्पर्शाः' शव्दादिभिः संयोगाः ते 'शीतोष्णसुखदःखदाः' शीतम् उष्णं सुखं दुःखं च प्रयच्छन्ति इति। अथवा स्पृश्यन्ते इति स्पर्शाः विषयाः शव्दादयःष मात्राः च स्पर्शाः च शीतोष्णसुखदःखदाः। शीतं कदाचित् सुखं कदाचित् दुःखं तथा उष्णमपि अनियतरूपं, सुखदुःख पुनः नियतरूपे यतः न व्यभिचरतः अतः ताभ्यां पृथक् शीतोष्णयोः ग्रहणम्। यस्मात् ते मात्रास्पर्शादयः 'आगमपायिनः' आगम-अबायशीलाः तस्मात् अनित्या उत्पत्तिविलयरूपत्वात्। अतः तान् शीतोष्णादीन् 'तितिक्षस्व' प्रसहस्व तेषु हर्षं विषादं च मा कार्षीः इत्यर्थः।

